# ॥ गणेशस्तवः ॥ —Ganeshastava

अजं निर्विकल्पं निराकारमेकं
निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं
परब्रह्मरूपं गणेशं भजेम ॥१॥

1. We worship the unborn, unchanging, formless, the one beyond bliss and full of bliss, who is the fullness of non-duality, the supreme, devoid of qualities, without differences, and beyond desire, Shri Ganesha, the Supreme Brahman personified.

गुणातीतमानं चिदानन्दरूपं
चिदाभासकंसर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं
परब्रह्मरूपं गणेशं भजेम ॥२॥

2. We worship the one beyond the gunas, the embodiment of bliss consciousness, the light of consciousness, the all-pervading, who is the source, course, and goal of knowledge, whom the sages meditate upon, who is formless as akasha, the highest Lord, Shri Ganesha, the Supreme Brahman personified.

जगत्कारणं कारणज्ञानरूपं
सुरादिंसुखादिं गुणेशं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं
परब्रह्मरूपं गणेशं भजेम ॥३॥

3. We worship Him who is the cause of the universe, the source of knowledge, the origin of the Devas, the source of happiness, the Lord of the gunas, Shri Ganesha, who pervades the universe and is worshipped by all, the Lord of the gods, Shri Ganesha, the Supreme Brahman personified.

www.tantrik-astrologer.in